Bergpredigt in Sanskrit

Auszug aus einer Sanskrit-Übersetzung der Bibel

Ende April 2008 konnte ich durch viel Glück die Ganzlederausgabe der 1851 erschienenen zweiten Auflage der 700seitigen Übersetzung des Neuen Testaments in Sanskrit ersteigern:

The New Testament
of our Lord and Saviour Jesus Christ
in Sanscrit.
Translated from the Greek
by the Calcutta Baptist Missionaries
with native assistants.
Calcutta 1851
Second Edition

Dharmya-pustakasya śeṣāṃśaḥ
arthataḥ
prabhunā yīśu-khrīṣṭena nirūpitasya
nūtana-dharmya-niyamasya
grantha-saṃgrahaḥ

Ich bringe hier vorab die Bergpredigt, d.h. die Kapitel 5 bis 7, des Matthäus-Evangeliums, als Scan der Ausgabe von 1851. Es ist von mir jedoch geplant, das ganze erste Evangelium, und zwar nicht einfach als Scan, sondern als eine völlig neu gesetzte Sanskrit-Übersetzung in Devanagari und Transliteration, nebst deutschem Bibel-Text, sowie mit Erläuterung von seltenen Sanskritwörtern und grammatikalischen Besonderheiten, auf meiner Website für Sanskrit-Lernende als eine Ergänzung zu meinem Sanskrit-Kompendium zu veröffentlichen.

Ulrich Stiehl, Heidelberg, den 30. April 2008

http://www.sanskritweb.net

THE

NEW TESTAMENT

OF OUR

LORD AND SAVIOUR

JESUS CHRIST,

IN SANSCRIT.

TRANSLATED FROM THE GREEK

BY THE CALCUTTA BAPTIST MISSIONARIES

WITH NATIVE ASSISTANTS.

Calcutta:

PRINTED AT THE BAPTIST MISSION PRESS, CIRCULAR ROAD, FOR THE BIBLE TRANSLATION SOCIETY, AND THE AMERICAN AND FOREIGN BIBLE SOCIETY.

1851.

Second Edition.

धर्म्मपुस्तकस्य शेषांशः ।

अर्थतः

प्रभुना यीशुख्रीष्टेन

निरूपितस्य

नूतनधर्म्मनियमस्य

ग्रन्थसङ्ग्रहः ।

ईंलण्डीयवङ्गदेशीयपण्डितै र्यूनानीयभाषातो व्याकृतः

धर्म्मसमाजसाहाय्येन मुद्राक्षराङ्कितस्य ।

कलिकातानगरे

१७७१ शाके ईं सन १८५१ ।

वदन्ति एतावुभौ जलधौ जालं क्षिपन्तौ ददर्श, यतस्तौ मीन-
१९ धारिणावास्ताम्। तदा स तावाहूय व्याजहार, युवां मम
२० पश्चाद् आगच्छतं, युवामहं मनुजधारिणौ करिष्यामि। तेनैव
२१ तौ जालं विहाय तस्य पश्चात् आगच्छताम्। अनन्तरं
तस्मात् स्थानात् व्रजन् व्रजन् सिवदियस्य सुतौ याकूब्
योहन्नामानौ द्वौ सहजौ तातेन सार्द्धं नौकोपरि जालस्य
२२ जीर्णोद्धारं कुर्व्वन्तौ वीक्ष्य तावाहूतवान्। तत्क्षणात् तौ नावं
स्वतातञ्च विहाय तस्य पश्चाद्गामिनौ बभूवतुः।
२३ अनन्तरं भजनभवने समुपदिशन् समुपदिशन् राज्यस्य
सुसंवादं प्रचारयन् प्रचारयन् मनुजानां सर्व्वप्रकारान् रोगान्
सर्व्वप्रकारपीडाश्च शमयन् शमयन् यीशुः कृत्स्नं गालील्देशं
२४ भ्रमितुम् आरभत। तेन कृत्स्नसुरियादेशस्य मध्यं तस्य
यशो व्याप्नोत्, अपरं भूतग्रस्ता अपस्माररोगिणः पक्षाघाति-
प्रभृतयश्च यावन्तो मनुजा नानाविधव्याधिभिः क्लिष्टा आसन्,
तेषु सर्व्वेषु तस्य समीपम् आनीतेषु स तान् स्वस्थान् चकार।
२५ एतेन गालील्-दिकापलि-यिरूशालम्-यिहूदीयदेशेभ्यो यर्द्दनः
पाराच्च बहवो मनुजास्तस्य पश्चाद् अगच्छन्।

---

५ पञ्चमोऽध्यायः।

१ ख्रीष्टोपदेशारम्भः ३ धन्यजनानां निर्णयः १३ ख्रीष्टशिष्याणां लवणदीप्तिस्वरूपत्व-कथनं १७ व्यवस्थासाधनाय ख्रीष्टावतारः २१ वधक्रोधयोर्निषेधः २७ पारदारिकत्वप्रतिषेधः ३३ शपथनिषेधः ३८ हिंसाप्रतिषेधः ४३ रिपुभिः सार्द्धं प्रीतिव्यवस्था च।

१ अनन्तरं स जननिवहं निरीक्ष्य भूधरोपरि व्रजित्वा
२ समुपविवेश। तदानीं शिष्येषु तस्य समीपमागतेषु तेन तेभ्य
एषा कथा कथयाञ्चक्रे।

अभिमानहीना जना धन्याः, यतस्ते स्वर्गीयराज्यम् अधि- ३
करिष्यन्ति। खिद्यमाना मनुजा धन्याः, यस्मात् ते सान्त्वनां ४
प्राप्स्यन्ति। नम्रा मानवाश्च धन्याः, यस्मात् ते मेदिनीम् ५
अधिकरिष्यन्ति। धर्म्माय बुभुक्षिताः तृषार्त्ताश्च मनुजा धन्याः, ६
यस्मात् ते परितर्प्स्यन्ति। कृपालवो मानवा धन्याः, यस्मात् ते ७
कृपां प्राप्स्यन्ति। निर्म्मलहृदया मनुजाश्च धन्याः, यस्मात् ते ८
ईश्वरं द्रक्ष्यन्ति। मेलयितारो मानवा धन्याः, यस्मात् त ईश्व- ९
रस्य सन्तानत्वेन विख्यास्यन्ति। धर्म्मकारणात् ताडिता मनुजा १०
धन्या, यस्मात् स्वर्गीयराज्ये तेषामधिकारो विद्यते। यदा ११
मनुजा मम नामकृते युष्मान् निन्दन्ति ताडयन्ति मृषा नाना-
दुर्व्वाक्यानि वदन्ति च, तदा यूयं धन्याः। तदा आनन्दत, १२
तथा भृशं ह्लादध्वञ्च, यतः स्वर्गे भूयांसि फलानि लप्स्यध्वे;
ते युष्माकं पुरातनान् भविष्यद्वादिनोऽपि तादृग् अताडयन्।

यूयं मेदिन्यां लवणरूपाः, किन्तु यदि लवणस्य लवण- १३
त्वम् अपयाति, तर्हि तत् केन प्रकारेण स्वादुयुक्तं भविष्यति?
तत् कस्यापि कार्य्यस्यायोग्यत्वात् केवलं बहिः प्रक्षेप्तुं नराणां
पदतलेन दलयितुञ्च योग्यं भवति। यूयं जगति दीप्तिरूपाः, १४
भूधरोपरि स्थितं नगरं गुप्तं भवितुं नहि शक्ष्यति। अपरं १५
मनुजाः प्रदीपान् प्रज्वाल्य द्रोणाधो न स्थापयन्ति, किन्तु
दीपाधारोपर्य्येव स्थापयन्ति, तेन ते दीपा गेहस्थितान् सक-
लान् प्रकाशयन्ति। येन मानवा युष्माकं सत्कर्म्माणि विलोक्य १६
युष्माकं स्वर्गस्थं पितरं धन्यं वदन्ति, तेषां समक्षं युष्माकं
दीप्तिस्तादृक् प्रकाशताम्।

अहं व्यवस्थां भविष्यद्वाक्यञ्च लोप्तुम् आगतवान्, इत्थं १७

मानुभवत, ते द्वे लोप्तुं नागतवान्, किन्तु सफले कर्त्तुम्
१८ आगतोऽस्मि । अपरं युष्मान् अहं तथ्यं वदामि यावत् व्योम-
मेदिन्यो र्ध्वंसो न भविष्यति, तावत् सर्व्वस्मिन् सफले न जाते
१९ व्यवस्थाया एका मात्रा विन्दुरेकोऽपि वा न लोप्स्यते । तस्मात्
यो जन एतासाम् आज्ञानाम् अतिक्षुद्राम् एकाज्ञामपि
लंघते मनुजांश्च तथैव शिक्षयति, स स्वर्गीयराज्ये सर्व्वेभ्यः
क्षुद्रत्वेन विख्यास्यते, किन्तु यो जनस्तां पालयति, तथैव
२० शिक्षयति च, स स्वर्गीयराज्ये प्रधानत्वेन विख्यास्यते। अपरं
युष्मान् अहं वदामि, अध्यापकफिरूशिमानवानां धर्म्मानुष्ठा-
नात् युष्माकं धर्म्मानुष्ठाने नोत्तमे जाते यूयम् ईश्वरीयराज्यं
प्रवेष्टुं न शक्ष्यथ ।

२१ अपरञ्च त्वं नरं मा बधीः, यस्मात् यो नरं हन्ति, स
विचारसभायां दण्डार्हो भविष्यति, पूर्व्वकालीनजनेभ्य इति
२२ कथितमासीत्, युष्माभिरश्रावि । किन्त्वहं युष्मान् वदामि, यः
कश्चित् कारणं विना निजभ्रात्रे कुप्यति, स विचारसभायां
दण्डार्हो भविष्यति; यः कश्चिच्च स्वीयसहजं निर्ब्बोधं वदति,
स महासभायां दण्डार्हो भविष्यति; पुनश्च त्वं मूढ इति
वाक्यं यदि कश्चित् स्वीयभ्रातरं वक्ति, तर्हि नरकाग्नौ स
२३ दण्डार्हो भविष्यति । अतो वेद्याः समीपं निजनैवेद्ये समानी-
तेऽपि निजभ्रातरं प्रति कस्माच्चित् कारणात् त्वं यदि दोषी
२४ विद्यसे, तदानीं तव तस्य स्मृति र्जायते च, तर्हि तस्या वेद्याः
समीपे निजनैवेद्यं निधाय तदैव गत्वा पूर्व्वं तेन सार्द्धं मिल,
२५ पश्चात् आगत्य निजनैवेद्यं निवेदय । अन्यच्च यावत् विवादिना
सार्द्धं वर्त्मनि तिष्ठसि, तावत् तेन सार्द्धं मेलनं कुरु; नो चेत्

विवादी विचारयितुः समीपे त्वां समर्पयति विचारयिता च
रक्षिणः सन्निधौ समर्पयति तदा त्वं कारायां बध्येथाः। तर्हि २६
त्वामहं तथ्यं ब्रवीमि, शेषकपर्द्दकेऽपि न परिशोधिते तस्मात्
स्थानात् कदापि वहिरागन्तुं न शक्ष्यसि।

अपरं त्वं मा व्यभिचर, यदेतद् वचनं पूर्व्वकालीनलोकेभ्यः २७
कथितमासीत्, तद् यूयं श्रुतवन्तः; किन्त्वहं युष्मान् वदामि, २८
यदि कश्चित् कामतः काञ्चन योषितं पश्यति, तर्हि स मनसा
तदैव व्यभिचरितवान्। तस्मात् तव दक्षिणं नेत्रं यदि त्वां २९
बाधते, तर्हि तन्नेत्रम् उत्पाट्य दूरे निक्षिप, यस्मात् तव सर्व्व-
वपुषो नरके निक्षेपात् तवैकाङ्गस्य नाशो वरं। यद्वा तव दक्षिणः ३०
करो यदि त्वां बाधते, तर्हि तं करं छित्त्वा दूरे निक्षिप,
यतः सर्व्ववपुषो नरके निक्षेपात् एकाङ्गस्य नाशो वरं।

उक्तमास्ते, यदि कश्चिन् निजजायां परित्यक्तुम् इच्छति, ३१
तर्हि स तस्यै त्यागपत्रं ददातु। किन्त्वहं युष्मान् व्याहरामि, ३२
व्यभिचारदोषे न जाते यदि कश्चिन् निजजायां परित्यजति,
तर्हि स तां व्यभिचारयति; यश्च तां त्यक्तां स्त्रियं विवहति,
सोपि व्यभिचरति।

पुनश्च त्वं मृषा शपथम् न कुर्व्वन् ईश्वराय निजशपथं ३३
पालय, पूर्व्वकालीनलोकेभ्यो यैषा कथा कथिता, तामपि यूयं
श्रुतवन्तः। किन्त्वहं युष्मान् वदामि, कमपि शपथं मा कार्ष्ट, ३४
अर्थतः स्वर्गनाम्ना न, यतः स ईश्वरस्य सिंहासनं; पृथिव्या ३५
नाम्नापि न, यतः सा तस्य पादपीठं; यिरूशालमो नाम्नापि
न, यतः सा महाराजस्य पुरी; निजशिरोनाम्नापि न, यस्मात् ३६
तस्यैकं कचमपि सितम् असितं वा कर्त्तुं त्वया न शक्यते। अपरं ३७

यूयं संलापसमये केवलं भवतीति न भवतीति च वदत यत
इतोऽधिकं यत् तत् पापात्मनो जायते।
३८ अपरं लोचनस्य विनिमयेन लोचनं दन्तस्य विनिमयेन
३९ दन्तः पूर्व्वोक्तमिदं वचनञ्च युष्माभिरश्रूयत। किन्त्वहं युष्मान्
वदामि यूयं हिंसकं नरं मा व्याघातयत। किन्तु केनचित्
तव दक्षिणकपोले चपेटाघाते कृते तं प्रति वामं कपोलञ्च
४० व्याघोटय। अपरं केनचित् त्वया सार्द्धं विवादं कृत्वा तव परि-
४१ धेयवसने जिघृक्षिते तस्मायुत्तरीयवसनमपि देहि। यदि
कश्चित् त्वां क्रोशमेकं नयनार्थं अन्यायतो धरति, तदा तेन
४२ सार्द्धं क्रोशद्वयं याहि। यस्य मानवस्त्वां याचते, तस्मै देहि,
यदि कश्चित् तुभ्यं धारयितुम् इच्छति, तर्हि तं प्रति परां-
मुखो मा भूः।
४३ निजसमीपवासिनि प्रेम कुरु, किन्तु शत्रुं प्रति द्वेषं कुरु,
४४ यदेतत् पुरोक्तं वचनं एतदपि यूयं श्रुतवन्तः। किन्त्वहं युष्मान्
वदामि, यूयं रिपुष्वपि प्रेम कुरुत, ये च युष्मान् शपन्ते, तान्
आशिषं वदत, ये च युष्मान् ऋतीयन्ते, तेषां मङ्गलं कुरुत,
ये च युष्मान् निन्दन्ति, ताडयन्ति च, तेषां कृते प्रार्थयध्वं।
४५ तत्र यः सतामसताञ्चोपरि प्रभाकरम् उदाययति, तथा
धार्म्मिकानामधार्म्मिकानाञ्चोपरि नीरं वर्षयति तादृशो यो
४६ युष्माकं स्वर्गस्थः पिता, यूयं तस्यैव सन्ताना भविष्यथ। ये
युष्मासु प्रेम कुर्व्वन्ति, यूयं यदि केवलं तेष्वेव प्रेम कुरुथ,
तर्हि युष्माकं किं फलं भविष्यति? चण्डाला अपि तादृशं
४७ किं न कुर्व्वन्ति? अपरं यूयं यदि केवलं स्वीयभ्रातृत्वेन नमत,
तर्हि किं महत् कर्म्म कुरुथ? चण्डाला अपि तादृशं किं न

कुर्व्वन्ति? तस्मात् युष्माकं स्वर्गस्थः पिता यथा पूर्णो भवति, ४८
यूयमपि तादृशा भवत।

---

६ षष्ठोऽध्यायः।

१ धर्म्मकर्म्मणः कथनं २ दानकरणव्यवस्थापनं ५ प्रार्थनव्यवस्थापनं १६ उपवासव्यवस्थापनं १९ धनसञ्चयोपदेशनं २४ धर्म्मचेष्टायां आवश्यकत्वञ्च।

सावधाना भवत, मनुजान् दर्शयितुं तेषां गोचरे धर्म्म- १
कर्म्म मा कुरुत, तथा कृते युष्माकं स्वर्गस्थपितुः सकाशात्
किञ्चन फलं न प्राप्स्यथ।

त्वं यदा ददासि तदा कपटिनो जना यथा मनुजेभ्यः २
प्रशंसां प्राप्तुं भजनभवने राजमार्गे च तूरीं वादयन्ति, तथा
मा कुरु, अहं तुभ्यं यथार्थं कथयामि, ते स्वकायं फलम्
अलभन्त। किन्तु त्वं यदा ददासि, तदा निजदक्षिणकरो यत् ३
करोति, तद् वामकरं मा ज्ञापय। तेन तव दानं गुप्तं ४
भविष्यति यस्तु तव पिता गुप्तदर्शी, स प्रकाश्य तुभ्यं फलं
दास्यति।

अपरं यदा प्रार्थयसे, तदा कपटिनइव मा कुरु, यस्मात् ५
ते भजनभवने राजमार्गस्य कोणे तिष्ठन्तो लोकान् दर्शयन्तः
प्रार्थयितुं प्रीयन्ते; अहं युष्मान् तथ्यं वदामि, ते स्वकीय-
फलं प्राप्नुवन्। तस्मात् प्रार्थनाकाले अन्तरागारं प्रविश्य द्वारं ६
रुद्ध्वा गुप्तं पश्यतस्तव पितुः समीपे प्रार्थयस्व; तेन तव यः
पिता गुप्तदर्शी, स प्रकाश्य तुभ्यं फलं दास्यति। अपरं प्रार्थ- ७
नाकाले देवपूजकाइव मुधा पुनरुक्तिं मा कुरु, यस्मात् ते
बोधन्ते, बहुवारं कथायां कथितायां तेषां प्रार्थना ग्राहिष्यते।
यूयं तेषामिव मा कुरुत, यस्मात् युष्माकं यद् यत् प्रयोजनं ८

९ याचनातः प्रागेव युष्माकं पिता तत् जानाति। अतएव
यूयम् ईदृक् प्रार्थयध्वं, हे अस्माकं स्वर्गस्थपितः, तव नाम
१० पूज्यं भवतु। तव राजत्वं भवतु; तवेच्छा स्वर्गे यथा तथैव
११ मेदिन्यामपि सफला भवतु। अस्माकं प्रयोजनीयम् आहारम्
१२ अद्य देहि। वयं यथा निजापराधिनः क्षमामहे, तथैवास्माकम्
१३ अपराधान् क्षमस्व। अस्मान् परीक्षां मानय, किन्तु पापात्मनो
रक्ष; (राजत्वं गौरवं पराक्रमः एते सर्व्वे सर्व्वदा तव; तथास्तु)।
१४ यदि यूयम् अन्येषाम् अपराधान् क्षमध्वे तर्हि युष्माकं स्वर्गस्थ-
१५ पितापि युष्मान् क्षमिष्यते; किन्तु यदि यूयम् अन्येषाम्
अपराधान् न क्षमध्वे, तर्हि युष्माकं जनकोऽपि युष्माकम् अप-
राधान् न क्षमिष्यते।

१६ अपरम् उपवासकाले कपटिनो जना मानुषान् उपवासं
ज्ञापयितुं स्वेषां वदनानि म्लानानि कुर्व्वन्ति, यूयं तद्वव विषण्ण-
वदना मा भवत; अहं युष्मान् तथ्यं वदामि ते स्वकीयफलम्
१७ अलभन्त। यदा त्वम् उपवससि, तदा यथा लोकैस्त्वं उपवा-
सीव न दृश्यसे, किन्तु तव योऽगोचरः पिता तेनैव दृश्यसे,
१८ तत्कृते निजशिरसि तैलं मर्द्दय वदनञ्च प्रक्षालय; तेन तव
यः पिता गुप्तदर्शी स प्रकाश्य तुभ्यं फलं दास्यति।

१९ अपरं यत्र स्थाने कीटाः कलङ्काश्च क्षयं नयन्ति, चौराश्च
सन्धिं कर्त्तयित्वा चोरयितुं शक्नुवन्ति, तादृश्यां मेदिन्यां
२० स्वार्थं धनं मा संचिनुत। किन्तु यत्र स्थाने कीटाः कलङ्काश्च
क्षयं न नयन्ति, चौराश्च सन्धिं कर्त्तयित्वा चोरयितुं न शक्नु-
२१ वन्ति, तादृशे स्वर्गे धनं सञ्चिनुत। यस्मात् यत्र स्थाने युष्माकं
२२ धनं तत्रैव स्थाने युष्माकं मनांसि। लोचनं देहस्य प्रदीपकं,

तस्मात् यदि तव लोचनं प्रसन्नं भवति, तर्हि तव कृत्स्नं वपु
र्दीप्तियुक्तं भविष्यति। किन्तु लोचनेऽप्रसन्ने तव कृत्स्नं वपुः २३
तमिस्रयुक्तं भविष्यति। अतएव या दीप्तिस्त्वयि विद्यते, सा यदि
तमिस्रयुक्ता भवति, तर्हि तत् तमिस्रं कियन् महत्। कोऽपि २४
मनुजो द्वौ प्रभू सेवितुं न शक्नोति, यस्माद् एकं संमन्य तदन्यं न
सम्मन्यते, यद्वा एकत्र मनो निधाय तदन्यम् अवमन्यते; तथा
यूयमपीश्वरं लक्ष्मीञ्चेत्युभे सेवितुं न शक्नुथ।

अपरम् अहं युष्मभ्यं तथ्यं कथयामि, किं भक्षिष्यामः? किं २५
पास्यामः? इति प्राणधारणाय मा चिन्तयत; किं परिधा-
स्यामः? इति कायरक्षणाय न चिन्तयत; भक्ष्यात् प्राणा
वसनाच्च वपूंषि किं श्रेष्ठाणि न हि? विहायसो विहङ्गमान् २६
विलोकयत; ते नोप्यन्ते न कृत्यन्ते भाण्डागारे न सञ्चीयतेऽपि;
तथापि युष्माकं स्वर्गस्थः पिता तेभ्य आहारं वितरति। यूयं २७
तेभ्यः किं श्रेष्ठा न भवथ? युष्माकं कश्चित् मनुजः चिन्तयन्
निजायुषः क्षणमपि वर्द्धयितुं शक्नोति? अपरं वसनाय कुत- २८
श्चिन्तयत? क्षेत्रोत्पन्नानि पुष्पाणि कथं वर्द्धन्ते तदालोचयत।
तानि तन्तून् नोत्पादयन्ति किमपि कार्य्यं न कुर्व्वन्ति; २९
तथाप्यहं युष्मान् वदामि, सुलेमान् तादृग् ऐश्वर्य्यवानपि
तत्पुष्पमिव विभूषितो नासीत्। तस्मात् अद्य विद्यमानं श्वः ३०
चुल्ल्यां निक्षेप्स्यते तादृशं यत् क्षेत्रस्थितं कुसुमं तत् यदीश्वर
इत्थं विभूषयति, तर्हि हे स्तोकप्रत्ययिनो युष्मान् किं न
परिधापयिष्यति? तस्मात् अस्माभिः किमत्स्यते? किञ्च पायि- ३१
ष्यते? किं वा परिधायिष्यते, इति न चिन्तयत। यस्मात् ३२
देवार्च्चका अपीति चेष्टन्ते; एतेषु द्रव्येषु प्रयोजनमस्तीति युष्माकं

३३ स्वर्गस्थः पिता जानाति । अतएव प्रथमत ईश्वरीयराज्यं
३४ धर्म्मञ्च चेष्टध्वं, तत एतानि वस्तूनि युष्मभ्यं प्रदायिष्यन्ते । श्वः
कृते मा चिन्तयत, श्वएव स्वयं स्वमुद्दिश्य चिन्तयिष्यति ;
अद्यतनी या चिन्ता साद्यकृते प्रचुरतरा ।

---

७ सप्तमोऽध्यायः ।

१ दोषीकरणप्रतिषेधः ७ प्रार्थनाकरणोपदेशः १३ संकीर्णद्वारेण प्रवेशोपदेशः १५ मृषाभविष्यद्वादिभ्यः सावधानत्वोपदेशः २१ ईश्वरेष्टकर्म्मकरणावश्यकत्वं २४ ज्ञान्यज्ञानिनां दृष्टान्तः २८ खीष्टोपदेशस्य समाप्तिश्च ।

१ यथा यूयं दोषीकृता न भवथ, तत्कृतेऽन्यं दोषिणं मा
२ कुरुत । यतो यादृशेन दोषेण यूयं परान् दोषिणः कुरुथ,
तादृशेन दोषेण यूयमपि दोषीकृता भविष्यथ, अन्यच्च येन
परिमाणेन युष्माभिः परिमीयते, तेनैव परिमाणेन युष्म-
३ त्कृते परिमायिष्यते । अपरञ्च निजनयने या नासा विद्यते,
ताम् अनालोच्य तव सहजस्य लोचने यत् तृणम् आस्ते,
४ तदेव कुतो वीक्षसे? तव निजलोचने नासायां विद्यमानायां,
हे भ्रातः, तव नयनात् तृणं वहिष्कर्तुं अनुजानीहि, कथा-
५ मेतां निजसहजाय कथं कथयितुं शक्नोषि? हे कपटिन्,
आदौ निजनयनात् नासां वहिष्कुरु ततो निजदृष्टौ सुप्र-
सन्नायां तव भ्रातु र्लोचनात् तृणं वहिष्कर्तुं शक्ष्यसि ।
६ अन्यच्च सारमेयेभ्यः पवित्रवस्तूनि मा वितरत, वराहाणां
समक्षञ्च मुक्ता मा निक्षिपत ; निक्षेपणात् ते ताः सर्व्वाः पदै
र्दलयिष्यन्ति, परावृत्य युष्मानपि विदारयिष्यन्ति ।
७ याचध्वं ततो युष्मभ्यं दायिष्यते; मृगयध्वं तत उद्देशं
लप्स्यध्वे ; द्वारम् आहत, ततो युष्मत्कृते मुक्तं भविष्यति ।

यस्माद् येन याच्यते, तेन लभ्यते; येन मृग्यते तेनोद्देशः ८
प्राप्यते; येन च द्वारम् आहन्यते, तत्कृते द्वारं मोच्यते।
आत्मजेन पूपे प्रार्थिते तस्मै पाषाणं विश्राणयति, मीने याचिते ९
च तस्मै भुजगं वितरति, एतादृशः पिता युष्माकं मध्ये क आस्ते? १०
तस्माद् यूयम् अभद्राः सन्तोऽपि यदि निजबालकेभ्य उत्तमं ११
द्रव्यं दातुं जानीथ, तर्हि युष्माकं स्वर्गस्थः पिता स्वीय-
याचकेभ्यः किमुत्तमानि वस्तूनि न दास्यति? युष्मान् प्रती-
तरेषां यादृशो व्यवहारो युष्माकं प्रियः, यूयं तान् प्रति १२
तादृशानेव व्यवहारान् विधत्त; यस्माद् व्यवस्थाभविष्य-
द्वादिनां वचनानाम् इति सारम्।

सङ्कीर्णद्वारेण प्रविशत; यतो नरकगमनाय यद् द्वारं १३
तद् विस्तीर्णं यच्च वर्त्म तद् बृहत् तेन बहवः प्रविशन्ति।
अपरं स्वर्गगमनाय यद् द्वारं तत् कीदृक् संकीर्णं। यच्च १४
वर्त्म तत् कीदृग् दुर्गमम्। तदुद्देष्टारः कियन्तोऽल्पाः। अप- १५
रञ्च ये जना मेषवेशेन युष्माकं समीपम् आगच्छन्ति,
किन्त्वन्तर्दुरन्ता वृका एतादृशेभ्यो भविष्यद्वादिभ्यः सावधाना
भवत, यूयं फलेन तान् परिचेतुं शक्नुथ। मनुजाः किं कण्ट- १६
किनो वृक्षाद् द्राक्षाफलानि शृगालकोलितश्च उडुम्बर-
फलानि शातयन्ति? तद्वद् उत्तम एव पादप उत्तमफलानि १७
जनयति, अधमपादपएवाधमफलानि जनयति। किन्तूत्तम- १८
पादपः कदाप्यधमफलानि जनयितुं न शक्नोति, तथाधमोपि
पादप उत्तमफलानि जनयितुं न शक्नोति। अपरं ये ये १९
पादपा अधमफलानि जनयन्ति, ते कृत्ता वह्नौ क्षिप्यन्ते।
अतएव यूयं फलेन तान् परिचेष्यथ। २०

२१ ये जना मां प्रभुं वदन्ति, ते सर्व्वे स्वर्गराज्यं प्रवेक्ष्यन्ति
तन्न, किन्तु यो मानवो मम स्वर्गस्थस्य पितुरिष्टं कर्म्म करोति
२२ स एव प्रवेक्ष्यति। तद् दिने बहवो मां वदिष्यन्ति, हे
प्रभो हे प्रभो, तव नाम्ना किमस्माभि र्भविष्यद्वाक्यं न व्याहृतं?
तव नाम्ना भूताः किं न त्याजिताः? तव नाम्ना किं नाना-
२३ द्भुतानि कर्म्माणि न कृतानि? तदाहं वदिष्यामि, हे कुकर्म्मका-
रिणो युष्मान् अहं न वेद्मि, यूयं मत्समीपाद् दूरीभवत।
२४ यः कश्चित् ममैताः कथाः श्रुत्वा पालयति, स पाषाणो-
२५ परि गृहनिर्म्मात्रा ज्ञानिना सह मयोपमीयते। यतो वृष्टौ
सत्याम् आप्लाव आगते वायौ वाते च तेषु तद्गेहं लग्नेषु
२६ पाषाणोपरि तस्य भित्तेस्तन्न पतति। किन्तु यः कश्चित्
ममैताः कथाः श्रुत्वा न पालयति स सैकते गेहनिर्म्मात्रा
२७ ऽज्ञानिना उपमीयते। यतो जलवृष्टौ सत्याम् आप्लाव
आगते पवने वाते च तै र्गृहे समाघाते तत् पतति तत्पतनं
महद् भवति।
२८ यीशुनैतेषु वाक्येषु समापितेषु मानवास्तदीयोपदेशम्
२९ आश्चर्य्यं मेनिरे। यस्मात् स उपाध्याया इव तान् नोपदि-
देश किन्तु समर्थपुरुषइव समुपदिदेश।

---

८ अष्टमोऽध्यायः।

१ कुष्ठिनो निरामयत्वं ५ शतसेनापते र्दासस्य निरामयत्वं १४ पितरस्य श्वश्वा निरामयत्वं १६ बहुनराणां निरामयत्वं १८ खीष्टस्य पश्चाद्गामित्वस्य व्यवस्थापनं २३ झञ्झानिवारणं २८ भूतत्याजनञ्च।

१ यदा स पर्व्वताद् अवारोहत् तदा बहवो मानवास्तत्प-
२ श्चाद् वव्रजुः। एकः कुष्ठवान् आगत्य तं प्रणम्य बभाषे, हे



Sanskrit-Kompendium.
Ein Lehr-, Übungs- und Nachschlagewerk
Devanagari-Ausgabe. Von Ulrich Stiehl
4., überarb. und erw. Auflage, Heidelberg 2007, 512 Seiten, Großformat: 17 x 24,5 cm, Festeinband mit Fadenheftung, Ladenpreis nur 49,90 Euro, ISBN 978-3-87081-539-4
Verlagsgruppe Hüthig Jehle Rehm GmbH,
Im Weiher 10, 69121 Heidelberg, Tel. 06221/489-0.
Bestellung über jede Buchhandlung oder direkt beim Verlag.

Dieses Werk ist das erste Sanskritlehrbuch, das alle Möglichkeiten moderner Sprachdidaktik vollständig ausschöpft. Es ermöglicht erstmals ein zeitminimierendes Universitätsstudium, aber es ist auch bestens zum Selbststudium für Autodidakten geeignet. Obwohl es das Lernen so leicht wie möglich macht, geht es hinsichtlich des vermittelten Stoffs (Wortschatz, Formenlehre und Syntax) weit über das Niveau früherer Lehrbücher hinaus.

Prof. Dr. Dr. Manfred Mayrhofer urteilt:

"Ihr Buch ist wirklich eine gigantische Pionierleistung. Ich habe in meiner aktiven Zeit viel Sanskrit gelehrt. Wie man etwa mit dem "Stenzler" unterrichten könne, war mir immer schleierhaft; am ehesten ging es noch mit dem Büchlein von Georg Bühler, das ja in Österreich, nachdem Bühler in Wien wirkte, reichlich vorhanden war. Aber mit Ihrer gründlichen Arbeit ist das alles nicht vergleichbar."

Die 4. Neuauflage 2007 wurde um den "Teil 8: Textanalyse: Bhagavad-Gita" erweitert, der eine grammatikalische Analyse der Anfangskapitel der Bhagavad-Gita mit detaillierten Erläuterungen aller Feinheiten der Formen- und Satzlehre enthält, um den Lernenden den Übergang von dem Lehrbuch zur Lektüre von Originaltexten zu erleichtern.

Zu weiteren Einzelheiten siehe die Leseprobe: http://www.sanskritweb.net/deutsch/leseprobe.pdf

Websites: http://www.sanskritweb.net http://www.sanskritweb.org http://www.sanskritweb.de